GRAND ACADEMIC PORTAL
RESEARCH JOURNALS

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

# संस्कृतसाहित्यस्य विस्ताराय गङ्गासत्याः योगदानम्

**डॉ. नेहल नरेन्द्रकुमार दवे**[1]

**प्रस्तावना**

गङ्गासती सोरठ-प्रदेशीया मीरा इति प्रसिद्धा आसीत्। न केवलं भक्तिमार्गे अपि तु योगमार्गे, सङ्गीतमार्गे, ज्ञानमार्गे च अपि गङ्गासती कृतपरिश्रमा आसीत्। मीरायाः गुरुस्तु रविदासः आसीत्। रविदासस्य गुरुः रामानन्दाचार्यः आसीत्, यः कबीरदासस्य अपि गुरुः आसीत्। रामानन्दाचार्यः भरतांशत्वेन प्रसिद्धः।[2] कुत्रचित् गङ्गासत्याः गुरुः रामेतवन-महोदयः मन्यते।[3] परन्तु सोऽपि रामानन्द-परम्परायाः आसीत् इति मन्यते। एवं गुजरातराज्यस्य गङ्गासती भक्तिसम्प्रदायस्य विशिष्टतां गुर्जरभाषायां सर्वेभ्यः प्रायच्छत्। तया प्रमुखतया गुर्जर्भाषायां भजन-गीतानि लिखितानि सन्ति। तस्याः ५२ रचनाः भक्तिसम्प्रदाये अतीव प्रसिद्धाः सन्ति। तत्राऽपि "विजळी ने चमकारे मोतीडा परो पानबाई, अचानक अन्धारा थाशे रे" इति पद्यं तु गुजराती-समाजस्य कण्ठे, मनसि च पूर्णतया व्याप्तम् अस्ति। वेदान्तस्य अतीव जटीलानां विषयाणाम् एतादृशैः पद्यैः सहजताय निरूपणं गङ्गासत्याः वैशिष्ट्यम् अस्ति।

संस्कृतसाहित्यस्य विस्तारः त्रिधा भवति। प्रप्रथमं तु संस्कृतज्ञाः नवीनसंस्कृतरचनाः कुर्युः। द्वितीयन्तु अन्यभाषायाः साहित्यस्य संस्कृतानुवादोत्तरं संस्कृतसाहित्ये समावेशः भवेत्। तृतीयन्तु संस्कृतभाषायाः प्रभावः प्रादेशिकभाषासु प्रभावः भवेत्, येन संस्कृतशब्दाः चिरकालं यावत् अन्यभाषायां स्ववर्चस्वं सिद्धं कुर्युः। मूलस्य चर्चायाः काले उत अर्थावबोधनकाले निश्चयेन संस्कृतस्य, संस्कृतसाहित्यस्य च चर्चा भवेदेव। ततः जनाः संस्कृतसाहित्येन सह तस्य साहित्यस्य तुलनां कर्तुम् अपि प्रेरिताः भवेयुः। एवं संस्कृतसाहित्ये गङ्गासत्याः योगदानम् अपि अविस्मरणीयं स्वीकरणीयं भवति।

## जन्म, परिवारश्च

गङ्गासत्याः जन्म भावनगरजनपदस्य पालीताणा-उपजनपदात् ३५ कि.मी. अन्तरे स्थिते राजपराग्रामे १८४६ तमे वर्षे बभूव । तस्याः पितुः नाम 'श्रीभाईजीभाई जेसाजी सरबैया' आसीत् । मातुः नाम 'रूपाळीबा' आसीत् । गङ्गासत्याः विवाहः 'गिरासदास कहळसङ्ग कालुभा-गोहिल' इत्यनेन सह १८६४ तमे वर्षे अभूत् । सः भगतबापु इत्यपि प्रसिद्धः आसीत्। तयोः पुत्रस्य नाम "अजोभा", पुत्र्योः नाम क्रमेण बाईराजबा एवञ्च हरिबा इति आसीत्। तत्कालीन-राजपूतपरम्परानुसारं गङ्गासत्या सह 'पानबाई' नामाख्या कन्या सेविकारूपेण प्रेषिता आसीत् । 'पानबाई' गङ्गासत्याः सेविकारूपेण न अपि तु आत्मपथस्य सहगामिनी अपि आसीत् । ते द्वे धर्म-परायणे वयसा तु समाने एव आस्ताम् । सर्वाः नद्यः यथा गङ्गायां गङ्गारूपमेव धरन्ते, तथा एव 'पानबाई' अपि गङ्गासतीमया अभूत् ।

विकसितं पुष्पं परितः यथा मधुमक्षिकाः चरन्ति, तथैव ते परितः अनेकेषां सन्यासिनां, भक्तानां, गृहस्थानां, जिज्ञासूनां, दीनानां च सम्मर्दः भवति स्म । ते तेषां मार्गदर्शनं कुरुतः स्म। गार्हस्थ्य-जीवनम् अध्यात्म-जीवनञ्च द्वयोः सङ्गतिः संन्यास-परम्परायाः विशिष्टं लक्षणं वर्तते । अस्याः संन्यास-परम्परा-माध्यमेन आसन-प्राणायाम-मुद्रा-नाडीशुद्धि-क्रियायोगादिभिः ते ब्रह्माण्डस्य रहस्यानि ज्ञापितवत्यौ । गङ्गासती स्वयं सङ्गीते कृतपरिश्रमा अपि आसीत् । तस्याः मतमासीत् यत्, स्वरसाधना आत्म-ज्ञानमार्गे मुख्या अस्ति । श्रूयते यत्, गङ्गासती प्रतिदिनम् एकं भक्तिगीतं रचयति स्म इति। तत् गीतं 'पानबाई' इतीमाम् आत्मपथ-गमिनीं श्रावयति स्म । सा

[1] सहप्राध्यापकः, लकुलीश-योग-विश्वविद्यालयः, कर्णावती, 9427164478, nehaldca08@gmail.com

[2] https://www.rammangaldasji.iitk.ac.in/content/गुरु-परम्परा

[3] https://www.divyabhaskar.co.in/news/gangasti-saint-and-brave-together-128104851.html

https://www.gapbhasha.org/

GRAND ACADEMIC PORTAL
RESEARCH JOURNALS

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

ज्ञान: अध्ययन: परम्परा

'पानबाई' इतीमामुद्दिश्य गायति स्म । अतः गीतेषु पूर्वगीतस्य चर्चा उत विषयोऽपि दृश्यते । गङ्गासती 'पानबाई' इतीमां क्रमशः अध्यात्म-मार्गं प्रदर्शयति स्म।

## संस्कृतसाहित्यस्य विस्ताराय गङ्गासत्याः योगदानम्

गीतायां श्रीकृष्णः उक्तवान् यत्, सुखे दुःखे समे कृत्वा लाभालाभौ जयाजयौ।[4] तस्य एव अतीव गूढस्य वचनस्य गुर्जर्भाषायां गङ्गासती पद्यं लिखतवती। यथा -

મેરુ રે ડગે પણ જેનાં મનડાં ડગે નૈં પાનબાઈ! મરને ભાંગી પડે ભરમાંડ રે;
વિપત પડે તોયે વણસે નહીં ઈ તો, હરિજનના પરમાણ રે...
હરખ ને શોકની આવે નહીં હેડકી ને, જેણે શિશ તો કર્યા કુરબાન રેસ
સદ્ગુરુ વચનમાં શૂરા થઈને ચાલે ને, મેલ્યાં અંતર કેરા માન રે...

पातञ्जलयोगसूत्रं योगश्चित्तवृत्तिनिरोधः[5] इति योगस्य व्याख्यां करोति। परन्तु चित्तनिरोधस्य नार्गत्वेन चित्तवृत्तेः निरोधाय समतायाः अभ्यासं सूचयति। यथा - मैत्री-करुणा-मुदिता-उपेक्षाणां सुख-दुःख-पुण्य-अपुण्य-विषयाणां भावनातः चित्तप्रसादनम्[6] इति। एतदेव वचनं गङ्गीसती पद्यमाध्यमेन कथयति। यथा -

શીલવંત સાધુને વારે વારે નમીએ પાનબાઈ! જેનાં બદલે નહીં વ્રતમાન રે,
ચિત્તની વૃત્તિ જેની સદા યે નિરમળી ને, જેને મહારાજ થિયા મે'બાન રે...
મન સ્થિર કરીને તમે આવોને મેદાનમાં, મિટાવું સરવે ક્લેશ રે,
હરિનો દેશ તમને એવો રે દેખાડું, જ્યાં નહીં વરણ કે વેશ રે...
કુપાત્રની આગળ વસ્તુ ન વાવીએ પાનબાઈ! સમજીને રહીએ ચૂપ રે,
મરને આવીને ધનનો ઢગલો કરે, ભલે હોય મોટા ભૂપ રે....

हठप्रदीपिकायां नाडीशुद्धेः अतीव महत्त्वं प्रदर्शितम् अस्ति। शिवस्थानात् पतदः शिवरसस्य उत बिन्दोः रहस्ये ज्ञाते सति एव कुण्डलिन्याः जागृती शक्या भवति। तदैव जीवः आत्मानं जानाति। उक्तञ्च -

**ऊर्ध्वजिह्वः स्थिरो भूत्वा सोमपानं करोति यः।**
**मासार्धेन न सन्देहो मृत्युं जयति योगविद्॥**[7]

ऋग्वेदः अपि समानं ज्ञानं प्रयच्छति। यथा -

**सोमं मन्यते पपिवान् यत्संपिंषन्त्योषधिम् ।**
**सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः ॥३॥**

एषः विषयः अपि गङ्गासती अतीव सहजतया स्वपद्ये वर्णयति। यथा -

**જાણ્યા જેવી આ તો અજાણ છે ને, અધુરિયાંને નો કે'વાય જી,**
**ગુપત રસનો ખેલ છે આ અટપટો ને, આંટી મેલો તો સમજાય જી...**
**નિરમળ થઈને તમે આવો મેદાનમાં ને, જાણી લેજો જીવ કેરી જાત રે...**
**સજાતિ વિજાતિની જુગતિ બતાડું ને બીબે પાડી દઉં બીજી ભાત રે...**
**પિંડ બ્રહ્માંડથી પર છે ગુરુજી પાનબાઈ! તેનો દેખાડું તમને દેશ જી,**
**ગંગાસતી એમ બોલિયાં ને રે, ત્યાં નહીં માયાનો જરીએ લેશ....**[8]

---

[4] श्रीमद्भवगवद्गीता, अध्यायः २, श्लो. ३८
[5] पातञ्जलयोगसूत्रं, पादः – १, सूत्रं - २
[6] पातञ्जलयोगसूत्रं, पादः – १, सूत्रं - ३३
[7] हठयोगप्रदीपिका, उपदेशः – ३, श्लो. ४४
[8] ગંગાસતીનાં ભજનમાળા -

https://www.gapbhasha.org/

## सारांशः

गङ्गासती केवलं भक्तिसम्प्रदायस्य ज्ञात्री न आसीत्। सा तु योगशास्त्रस्य, ज्ञानयोगस्य, लययोगस्य, सङ्गीतशास्त्रस्य, संस्कृतभाषायाः, गुजरातीभाषायाः च विदुषी आसीत्। एतेषां सर्वेषां शास्त्राणां सा वेदान्ते प्रतिपादितस्य अन्तिमसत्यस्य निरूपणे स्वजीवनं यापितवती। संस्कृतसाहित्यं केवलं भाषासाहित्यं नास्ति, तत् मनसः, शरीरस्य, समाजस्य, व्यवहारस्य च विज्ञानसाहित्यम् अस्ति। गङ्गासती तस्य संस्कृतसाहित्यस्य विज्ञानसाहित्यस्य मिश्रणं कृत्वा सरलभाषायां सहजभाषायां च प्रतिपादनं कृत्वा जनसामान्यानां महदुपकारं कृतवती। गुजरातप्रान्ते सा मीरा तु उच्यते, यतः सा भक्तेः अनेकानि पद्यानि अरचयत्। परन्तु सा तुलसीदासस्य सदृशी अपि परिगणयितुं शक्यते, यतः जनसामान्यस्य उद्धाराय सा अपि संस्कृतस्य विशालज्ञानपरम्पराम् अनुवादमाध्यमेन स्वानुभवमाध्यमेन च पद्यगङ्गारूपेण प्रवाहिताम् अकरोत्। इति शम्।

## सन्दर्भग्रन्थसूची

[1] स्वात्मारामस्य हठयोगप्रदीपिका, प्रकाशकः - कैवल्यधाम, संस्करणकर्ता - स्वामी दिगम्बरजी, डॉ. पीतम्बर झा, ISBN – 978-8189485122, वर्षम् - १९९८ (मूलरचना - https://sa.wikisource.org/s/6v1)
[2] हंसः सोऽहम् और दुनाखे (२०१४) छान्दोग्योपनिषद्, यशवंत प्रकाशन
[3] हठप्रदीपिका ज्योत्स्ना, सम्पादकः - स्वामी महेशानन्दादयः, प्रकाशकः - कैवल्यधाम, ISBN – 978-818948485139, संस्करणम् - २००४
[4] ईशावास्योपनिषत्, सम्पादकः - डॉ. उमेशान्द शास्त्री, स्वामी निश्चलानन्द गिरि, प्रकाशकः - श्री कैलास विद्या प्रकाशन - ऋषिकेश, संस्करणम् - ३, वर्षम् - २०१२
[5] ऋग्वेदः - सुबोध भाष्य, सम्पादकः - पद्मभूषणः श्रीदामोदर सतावलेकरः, स्वाध्याय मण्डल
[6] गोयन्दका (अनु. १९८८), श्रीमद्भगवद्गीता शांकरभाष्य हिन्दी-अनुवाद-सहित, गीताप्रेस, गोरखपुर
[7] बृहदारण्यकोनिषद्, गीताप्रेस
[8] અર્વાચીન ગુજરાતી સાહિત્યની વિકાસરેખા આધુનિક અને અનુઆધુનિક પ્રવાહો, લે. ડૉ. ધીરૂભાઈ ઠાકર, પ્ર. ગૂર્જર ગ્રન્થરત્ન કાર્યાલય, ISBN - 81-89166-36-0, સંસ્કરણ – 2006
[9] Apte (1890), The practicle Sanskrit-English Dictionary, ISBN – 9788121266284, Vaman Shivram Apte
[10] Apte, V. S. (1988). The student's Sanskrit-English dictionary: Containing appendices on Sanskrit prosody and important literary and geographical names in the ancient history of India. Motilal Banarsidass Publ.
[11] Four Chapters on Freedom, Editor- Swami Satyananda Saraswati, publisher- Yoga Publication Trust, Munger, Bihar, ISBN-978-81-85787-18-2, Version 2011
[12] Rao, K. R. (Ed. & Trans.). (2018). Patañjali's yogasūtra: A psychological study. D. K. Printworld.
[13] American Psychological Association. (September, 2019), References. https://apastyle.apa.org/style-grammar-guidelines/references

https://www.gapbhasha.org/